**7022OIA**

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2014-15)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - दशमी

**समय : होरात्रयम्** **पूर्णाङ्कः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मक-कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अङ्काः

खण्डः (घ) पठित-अवबोधनम् - 35 अङ्काः

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 10

अस्माकं देशः प्रकृति-पूजकः। सूर्यस्य, चन्द्रस्य, वृक्षस्य इत्यादीनां देवरूपं स्वीकृत्य पूजनस्य परम्परा अस्माकं देशे अस्ति। सम्पूर्णेऽपि संस्कृत-साहित्ये एतादृशं वर्णनम् अवलोकयितुं शक्यते। कवयः प्रकृति-वर्णनं तत्रापि चन्द्रस्य वर्णनम् अवश्यमेव कुर्वन्ति। शरद्पूर्णिमायाः रात्रौ अस्माकं देशे उत्सवः आचार्यते। अस्यां रात्रौ चन्द्रः स्व-पूर्णकलाभिः सह उदयति। जनाः रात्रि-काले पायसं पक्त्वा चन्द्र-किरण-सम्पर्के स्थापयन्ति। पश्चात् सर्वे कुटुम्बिनः मिलित्वा खादन्ति। लोक-मान्यता वर्तते यत् अस्यां रात्रौ चन्द्रेण स्वकिरणैः अमृतं किमपि विशिष्टं वा प्रसार्यते। अयम् उत्सवः सर्वैः सह प्रेम्णा व्यवहर्तव्यः इति सन्देशं प्रददाति।

I. **एकपदेन उत्तरत।**

(i) अस्माके देशः कीदृशः अस्ति?

(ii) कवयः प्रकति-वर्णने कस्य वर्णनम् अवश्यमेव कुर्वन्ति?

II. **पूर्णवाक्येन उत्तरत ।**

(i) चन्द्रः कदा स्वपूर्णकलाभिः सह उदयति?

(ii) अयम् उत्सवः किम् सन्देशं प्रददाति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् निर्देशानुसारम् चित्वा लिखत –**

(i) 'उदयति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) उत्सवः (ब) चन्द्रः (स) रात्रौ (द) अस्माकं

(ii) 'एतादृशम्' इति विशेषणपदस्य विशेष्यपदं किम्?

(अ) साहित्यं (ब) सम्पूर्णं (स) वर्णनं (द) संस्कृतं

(iii) 'अखिले' इति शब्दस्य पर्यायवाचिपदं किमत्र प्रयुक्तम्?

(अ) सम्पर्के (ब) साहित्ये (स) आचार्यते (द) सम्पूर्णे

(iv) 'विषम्' इत्यस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(अ) अमृतम् (ब) प्रेम्णा (स) सह (द) विशिष्टं

**(IV) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मकं-कार्यम् - (15 अङ्काः)

2 **भवतां नाम गौरवः। भवतः मित्रं अंकितः देहरादूनस्थिते सेंट जोसेफविद्यालयस्य छात्रावासे वसति। सः अस्वस्थः अस्ति। स्वास्थ्यरक्षणाय तं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रम् उत्तरपुस्तिकायां पुनः लिखत।** 5

बी 3/90, अशोकनगरम्

दिल्लीतः

तिथिः --------प्रिय __(i)__ !

सप्रेम नमस्ते।

पत्रेण __(ii)__ यत् भवान् गतसप्ताहात् __(iii)__ अस्ति। एतत् ज्ञात्वा अति __(iv)__ अभवत्। भवान् __(v)__ कथितम् आदेशम् अवश्यमेव __(vi)__ अन्यथा व्याधिः तु वर्धते एव। स्वस्थो जाते अपि __(vii)__ आवश्यकता भवति एव अतः कानिचित् __(viii)__ पर्यन्तं विश्रामोऽपि __(ix)__ अन्यथा व्याधिः पुनः पुनः जायते एव। अहं ईश्वरं प्रार्थयामि यत् भवान् शीघ्रमेव स्वस्थः भवतु। शेषं सर्वं कुशलम्।

भवतः मित्रम्

__(x)__

**मञ्जूषा**

पालयतु, गौरवः, दिनानि, अस्वस्थः, चिन्ता, ज्ञातम्, मित्र, विश्रामस्य, आवश्यकः, चिकित्सकेन

6 10 8 3 4 2 1 7 9 5

3 **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि लिखत।** 10



मञ्जूषा

राजा, सिंहासने, पंडित:, राजसभा, सेविका, तिष्ठति, सुसज्जित:, चिन्तित:, अङ्गरक्षक: पृच्छति, पश्यति, स्तम्भ:, हस्ते, सुखेन

अथवा

'चिकित्सालयस्य वर्णनम्' इति विषयम् अधिकृत्य मञ्जूषासहायतया च संस्कृतेन पञ्चवाक्यानि लिखत। 10

मञ्जूषा

चिकित्सका:, औषधि:, वातावरणं, शुद्धं भोजनम्, वायु:, प्रात:काल-भ्रमणम्, हितकरम्, स्वास्थ्यम्, प्रतिदिनं, अहर्निशम्, सेवाम्, औषधालय:, मिलन्ति, आगच्छन्ति, पश्यन्ति

## खण्ड: 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्का: )

4 अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत- 5

(i) महर्षि: दयानन्द: महान् वेदप्रचारक: आसीत्।

(ii) यथा+उचितम् तत् क्रियताम्

(iii) पुष्पगुच्छं पुष्पै: अलम्+कृतम् अस्ति।

(iv) तच्छ्रुत्वा अध्यापक: कोधित: अभवत्।

(v) अद्यत्वे आयु:+वेदं सर्वे मन्यन्ते।

5 अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत - 6

(i) शीतला छाया अपि पुरुषं प्रह्लादयति।

(अ) शीतलछाया (ब) शीतलाछाय:
(स) शीतल: छाय: (द) शीतलम् छाया

(ii) नृप: राजगृहे अस्ति।
(अ) राजानं गृहे (ब) राजन्गृहे
(स) राजान: गृहे (द) राज्ञ: गृहे

(iii) सज्जनमैत्री सुखं ददाति इति भवति।
(अ) सुखदात्री (ब) सुखदा
(स) सुखदात्रि (द) सुखद:

(iv) सा श्वेतवस्त्रं धारयति।
(अ) श्वेत: वस्त्र: (ब) श्वेतम् वस्त्रम्
(स) वेता: वस्त्राणि (द) श्वेते वस्त्रे

(v) पञ्चानां मुखानां समाहार: इति कथ्यते।
(अ) पञ्चमुखम् (ब) पञ्चमुखा:
(स) पञ्च:मुख: (द) पञ्चम: मुख:

(vi) तत्र पञ्चपात्रम् स्थितम् अस्ति।
(अ) पञ्चानां पात्राणां समाहार: (ब) पञ्च पात्रा:
(स) पञ्च पात्राणि (द) पञ्चसु पात्रेषु

6 **अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत।** 5

(i) कर्मयोगी नर: संसारे दुर्लभ:।
(ii) लीलावान् कृष्ण: गोपिकाभ्य: रोचते।
(iii) ईशवन्दना हृद्+ठक् आनन्दं प्रददाति।
(iv) मालाकारेण पुष्पाणि न त्रुट्+अनीयर्।
(v) सैनिकै: निरस्त्र: न हन्तव्य:।

7 **अधोलिखितेषु वाक्येषु मञ्जूषाया: उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत –** 5

(i) विषमे मार्गे _____ चलितव्यम्।
(ii) _____ ते पादपान् आरोपयन्ति।
(iii) वाटिकायाम् जना: _____ भ्रमन्ति।
(iv) यथा बीजम् _____ फलम्।
(v) _____ शोक: न करणीय:।

**मञ्जूषा**

अधुना, शनै:, वृथा, यथा–तथा, इतस्तत:

8 **अधोलिखितेसंवादे रिक्तस्थानानि वाच्यानुसारं उचितपदेन पूरयत।** 5

| | | |
|---|---|---|
| मधुरः | – | विवेक! त्वं दूरभाषयन्त्रेण केन सह वार्तालापं करोषि? |
| विवेकः | – | मया मित्रेण सह वार्तालापः __(i)__ । |
| मधुरः | – | किं तव मित्रम् संस्कृतं अपि पठति? |
| विवेकः | – | आम् मम __(ii)__ संस्कृतम् अपि पठ्यते। |
| मधुरः | – | तव मित्रस्य विद्यालये कति अध्यापकैः छात्राः पाठ्यन्ते? |
| विवेकः | – | तत्र शत-अध्यापकाः __(iii)__ पाठ्यन्ति। |
| जयः | – | किम् त्वं संस्कृतं पठसि? |
| रविः | – | आम्। __(iv)__ संस्कृतं पठ्यते। |
| जयः | – | किं संस्कृतस्य श्लोकान् पठसि? |
| रविः | – | आम् मया संस्कृतस्य __(v)__ पठ्यन्ते। |

9 **अधोलिखितेषु वाक्येषु अङ्कानां स्थाने संस्कृतपदानि लिखत।** 4

(i) राघवः सायं 5.30 वादने क्रीडित्वा गृहम् आगच्छति।

(ii) सः 6.00 वादने गृहकार्यं करोति।

(iii) सः 8.45 वादने भोजनं खादति।

(iv) सः 10.15 वादने शयनाय गच्छति।

## खण्ड : 'घ'

## पठित-अवबोधनम् – 35 अङ्काः

10 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** 5

अथ अन्यस्मिन् अहनि सः मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।

**I. एकपदेन उत्तरत।**

(i) दाहवेदनया भूमौ कः लुठति?

(ii) लोभवशात् अर्धज्वलितकाष्ठेन केन मेषः ताडितः?

**II. पूर्णवाक्येन उत्तरत।**

मेषस्य क्षितौ प्रलुठतः किम् अभवत्?

**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।**

(i) 'प्रविशति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) ऊर्णाप्रचुरः (ब) मेषः

(स) जाज्वल्यमानशरीरः (द) महानसम्

(ii) 'दिवसे' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्?

(अ) क्षितौ (ब) भूमौ

(स) अहनि (द) अन्यस्मिन्

11 **अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत –** 5

कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी।।

**I. एकपदेन उत्तरत।**

(i) का सुखदा भवति?

(ii) मानः कीदृशः अस्ति?

**II. पूर्णवाक्येन उत्तरत।**

त्यागी कीदृशः अस्ति?

**III. निर्देशानुसारम् उत्तरत –**

(i) श्लोके 'समर्थः' इति अर्थे किं पदं प्रयुक्तम्?

(अ) मानः (ब) त्यागी

(स) साधुः (द) दक्षः

(ii) 'दुःखं ददाति' इत्यस्य विपरीतार्थे श्लोके किं पदं प्रयुक्तम्?

(अ) मानः (ब) अनर्थफलः

(स) सुखदा (द) मैत्री

12 **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –** 5

(शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्)

शक्रः (याचकरूपः) – हेराजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतः अस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिवपश्येयम् चक्षुर्हीनः।

राजा – भगवन्! भवन्मनोरथं पूरयित्वा अहम् आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम् किं करवाणि?

विप्रः – यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

**प्रश्नाः (2 + 1 + 2 = 5)**

**I. एकपदेन उत्तरत।**

(i) कः नेत्रहीनयाचकरूपे आगतः?

(ii) याचकः किम् अवाञ्छत्?

**II. पूर्णवाक्येन उत्तरत।**

राजा याचकस्य मनोरथपूरणेन वस्तुतः किम् इच्छति?

**III. प्रदत्तविकल्पेभ्यः निर्देशानुसारम् उचितम् उत्तरम् चित्वा लिखत।**

(i) 'इच्छाम्' इति पदस्य पर्यायपदम् किम्?

(अ) दानम् (ब) मनोरथम् (स) चक्षुषः (द) याचकम्

(ii) 'इच्छामि' इति क्रियापदस्य किं कर्तृपदम्?

(अ) दानम् (ब) त्वत्तः

(स) चक्षुषः (द) अहम्

13 **मञ्जूषातः उचितपदानि चित्वा अधोलिखितश्लोकयोः भावार्थौ पूरयत।** 4

**I.** शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं, सः युक्तः स सुखी नरः।।

**भावार्थः** – यः ____(i)____ एव संसारे शरीरस्य त्यागात् पूर्वमेव कामस्य कोधस्य च ____(ii)____ सोढुं समर्थः भवति, सः एव ____(iii)____ पुरुषः ____(iv)____ भवति।

**II.** तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।

**भावार्थः** – अतः हे भरतवंशे श्रेष्ठ अर्जुन! ____(v)____ सर्वप्रथमम् ____(vi)____ वशे कृत्वा एनं पापिनं मारय यः मनुष्यस्य समस्तं ____(vii)____ विज्ञानञ्च ____(viii)____ ।

**मञ्जूषा**

त्वं, योगी, नाशयति, सुखी, इन्द्रियाणि, अस्मिन्, वेगम्, ज्ञानं

14 **मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत।** 4

चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

**अन्वय** – कृष्ण! मनः हि ____(1)____ प्रमाथि ____(2)____ दृढम् (च अस्ति)। अहम् तस्य ____(3)____ वायोः ____(4)____ सुदुष्करम् मन्ये।

**मञ्जूषा**

बलवद्, निग्रहं, चञ्चलं, इव

15 **वाक्येषु रेखांकितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत –** 4

(i) तत्र न स्थातव्यम्।

(ii) राजभवनं परित्यज्य वनं गच्छामः।

(iii) राष्ट्राणि कुराजान्तानि भवन्ति।

(iv) मदोद्धताः कपयः प्रहस्य अवदन्।

| | | |
|---|---|---|
| 16 | अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।<br>(i) प्राज्ञः कलहयुक्तं गृहं दूरतः परिवर्जयेत्। 8<br>(ii) राजादेशं श्रुत्वा सर्वे भयत्रस्ताः कपयः अचिन्तयन्। 6<br>(iii) राजा वैद्यान् आहूय अश्वरक्षार्थम् अपृच्छत्। 5<br>(iv) एकः मेषः जिह्वालोलुपतया महानसं प्रविश्य यत् पश्यति तत् भक्षयति। 1<br>(v) अस्माभिः गुरुजनोपदेशाः अवधीरिताः। 7<br>(vi) सूपकारेण मेषः अर्धज्वलितकाष्ठेन ताडितः। 2<br>(vii) अश्वाः प्राणत्राणाय इतस्ततः अधावन्। 4<br>(viii) ज्वलन् मेषः अश्वशालां प्रविशति। 3 | 4 |
| 17 | रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थम् चित्वा लिखत।<br>(i) कलहम् <u>अवेक्ष्य</u> यूथपतिः अवदत्।<br>(अ) दृष्ट्वा (ब) श्रुत्वा (स) भीतः (द) लिखित्वा<br>(ii) वयं <u>अटव्याम्</u> कटुफलानि न खादिष्यामः।<br>(अ) मार्गे (ब) गृहे (स) विपणौ (द) वने<br>(iii) आचार्यात् पादम् <u>आदत्ते</u>।<br>(अ) याति (ब) गृह्णाति (स) पठति (द) आगच्छति<br>(iv) <u>वाङ्मयं</u> तपः कर्तव्यम्।<br>(अ) वाणी (ब) वाचिकम् (स) भाषा (द) साहित्यम् | 4 |